# Dharmarajakritam Vishnu Stotram

# धर्मरजकृतं विष्णुस्तोत्रम्

## Document Information

Text title : Dharmarajakritam Vishnu Stotram

File name : dharmarajakRRitaMviShNustotram.itx

Category : vishhnu, vishnu, bRRihannAradIyapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : bRRihannAradIyapurANa | uttarabhAga | adhyAya 52/72-79||

Latest update : October 26, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

October 26, 2024

*sanskritdocuments.org*

# धर्मरजकृतं विष्णुस्तोत्रम्

धर्मराज उवाच ।
नमस्ते भगवन्देव लोकनाथाय तेजसे ॥ ५२-७२॥

क्षीरोदवासिनं देवं शेषभोगोरुशायिनम् ।
वरं वरेण्यं वरदं कर्तारं ह्यक्षयं प्रभुम् ॥ ५२-७३॥

विश्वेश्वरमजं विष्णुं सर्वज्ञमपराजितम् ।
नीलोत्पलदलश्यामं पुण्डरीकनिभेक्षणम् ॥ ५२-७४॥

सर्वगं निर्गुणं शान्तं जगद्धातारमव्ययम् ।
सर्वलोकविधातारं लोकनाथं सुखावहम् ॥ ५२-७५॥

पुराणपुरुषं वेद्यं व्यक्ताव्यक्तं सनातनम् ।
पुरा पुराणं स्रष्टारं लोकतीर्थं जगद्गुरुम् ॥ ५२-७६॥

श्रीवत्सवक्षसा युक्तं वनमाला विभूषितम् ।
पीतवस्त्रं चतुर्बाहुं शङ्खचक्रगदाधरम् ॥ ५२-७७॥

हारकेयूरसंयुक्तं मुकुटाङ्गदधारिणम् ।
सर्वलक्षणसंयुक्तं सर्वेन्द्रियविवर्जितम् ॥ ५२-७८॥

कूटस्थमचलं सूक्ष्मं ज्योतीरूपं सनातनम् ।
भावाभावविनिर्मुक्तं व्यापिनं प्रकृतेः परम् ॥ ५२-७९॥

तं नमस्ये जगन्नाथमीश्वरं सुखदं प्रभुम् ।
इत्येवं धर्मराजस्तु पुरा न्यग्रोधसन्निधौ ॥ ५२-८०॥

स्तुत्वा नानाविधैः स्तोत्रैः प्रणाममकरोत्तदा ।

इति नारदपुराणे उत्तरभागे द्विपञ्चाशत्तमाध्यायान्तर्गतं
धर्मराजकृतं विष्णुस्तोत्रं समाप्तम् ।

बृहन्नारदीयपुराण । उत्तरभाग । अध्याय ५२/७२-७९॥

bRRihannAradIyapurANa . uttarabhAga . adhyAya 52/72-79..

Proofread by PSA Easwaran

*Dharmarajakritam Vishnu Stotram*

pdf was typeset on October 26, 2024

Please send corrections to *sanskrit@cheerful.com*